Gyanshauryam, International Scientific Refereed Research Journal
© 2018 GISRRJ | Volume 1 | Issue 1 | ISSN : 2582-0095

# महाभाष्ये क्रिया निरूपणम्



**डॉ0 सुभाष चन्द्र मीणा**
सहायकाचार्यः व्याकरण विभाग,
केन्द्रीय संस्कृत विश्वविद्यालयः,
क0जे0सोमैया परिसर, मुम्बई,भारत।

**सारांशः** –क्रियानिरूपण विषय विचारे कृते तथ्यमेतदवगन्तुं शक्यते यत् शास्त्रे लोके च क्रियायाः कीदृशं व्यापकं सूक्ष्ममनु मानगम्यं, सर्वव्यवहारोपयोगी शब्दार्थ–समवेतं सिद्धसाध्यत्वोपेतं सामान्यविशेषक्रियात्वयुतम् अवयवसमूहत्वसमवेतां सर्वकारकोपकारमिति विविध भेदाभेदयुक्तं विद्यते; यां विना शास्त्र चिन्तनं पूर्णं भवितुं नार्हति, लोकव्यवहारश्च सिद्धः न स्यात्। कालस्य सार्थक्यमपि क्रियया सदैव सम्भवति नान्यथेति क्रियास्वरूपं सर्वत्र स्ववैशिष्ट्यम्।

मुख्यशब्दः–महाभाष्यः,क्रिया, व्यापकः, वाक्यपदीयम्, वार्तिकः, धातुः, भावः, कैयटः, तिङन्तः।

**प्रस्तावना :** क्रियानिरूपण विषयो महाभाष्ये तदनु वाक्यपदीये सुविचारितो द्रष्टुं शक्यते। यथा वार्तिकानुसारि भाष्यवचनं विद्यते ''क्रियावचनो धातुः'' भाव वचनो धातुः।[1] कैयटेन भाववचनः क्रियाभाववाची। भाष्कार निदर्शनं विद्यते क्रियाप्रधानमाख्यातम्।[2] अर्थात् यत्र क्रियायाः प्राधान्यं भवति क्रियाप्रधानभूता सती प्रतीयते तत्पदमाख्यातं तिङन्तपदं भवति। आख्यातं साव्ययकारकविशेषणं वाक्यमिति। सक्रियाविशेषणस्याऽपि आख्यातस्य वाक्यत्वस्वीकारेण तस्यापि संग्रहीतत्वात्। क्रियाया विशेषण कदाचित् सामानाधिकरण्येन भवति, कदाचित् वैयाधिकरण्येन। समाधिकण्येन क्रिया विशेषणं यथा मृदु पचति, इत्यादि। अत्र पचति अर्थस्य मृदु इत्यादि विशेषणविशिष्टस्यैव प्रतीतेः मृदु इत्यादिनां पचति आदि क्रियया सह सामानाधिकरण्यम्। यथाह– आख्यातं सविशेषमित्येव। सर्वणि धोतनि क्रियाविशेषणानि।[3] वाचो मुक्ति विषये– पचति भवति, भवति पक्ष्यति; भवति अपाक्षीत् इति एषैषां वाचो युक्तिः पचादयः क्रिया भवति क्रियायाः कर्त्रो भवन्ति इति। वाक्यपदीयकारः कथयति–

**आख्यातं तद्धितार्थस्य यत्किञ्चिदउपदर्शकम्।**
**गुणप्रधानयास्वद तज दृष्टो विपयर्यः।।[4]**

महाभाष्यकारः क्रियाविषयं नैकसूत्रभाष्ये निर्दिष्टवान् तत्र ''भूवादयो' धातवः इति सूत्र भाष्ये क्रिया स्वरूपं विवृण्वन् निगदति का पुनः क्रिया? का पुनरीहा? चेष्टा। का पुनश्चेष्टा? व्यापारः। सर्वथा भवात् शब्देनैव शब्दानाचष्टे न किञ्चि दर्थजातं निर्दिशति एवं जातीयका क्रियेति, क्रिया सम्बद्धां जिज्ञासामुद्भाव्याग्रे भाष्यकार कथयति' क्रिया नामेयमत्यन्ताडापरिदृष्टा अशक्या पिण्डीभूता निदर्शयितुम्, यथा गर्भो निर्लुठितः साऽसावनुमागम्या; कोऽसावनुमानः, इह सर्वेषु साधनेषु सन्निहितेषु कदाचित् पचती त्येतद् भवति कदाचित् न भवति। यस्मिन् साधने सन्निहिते पचति इति एतद् भवति सा नूनं क्रिया। अथवा यथा देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रिया। कथं पुनः ज्ञायते क्रियावचनाः पचादय इति। यदेतेषां करोतिना समानाधिकण्यम्। किं करोति? पचति। किं करिष्यति? पक्ष्यति। किमकार्षीत्? अपाक्षीत्। भाष्यभिप्रायोडस्ति यत् साधने सन्निहितं सत्येव पचति इत्यादिनां क्रियायाः प्रतीतिर्भवति। लिङ् निमित्ते लृङ्क्रियातिपत्तौ इति सूत्र भाष्ये साधनातिपत्त वपि इति वार्तिकं निराकुर्वन् भाष्यकारः कथयति; तत् तर्हि वक्तव्यम्? न वक्तव्यम्? निराकुर्वन् भाष्यकारः कथयति; तत् तर्हि वक्तव्यम्? न वक्तव्यम्? नान्तरेण साधनं क्रियायाः प्रवृत्ति अस्ति इति। साधनाति पतिश्चेत् क्रियाति पत्तिरपि भवति। तत्र क्रियातिपत्तावित्येव सिद्धम्।[6] वाक्यपदीय कारोऽपि भाव्याशयेन कथयति–

**स्वाश्रयं समवेतानां तद्वेदेवाश्रयान्तरे।**
**क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः।।[7]**

अर्थात् क्रिया निर्वृत्तौ द्रव्यस्य शक्तिः साधनम्; साध्येऽनया क्रियेति भाष्यकार प्रभृतयो विदुः। शक्तं हि द्रव्यं साधनम् न तु निराधारा शक्तिः, सम्भवति।

क्रियाविचार प्रसङ्गे भाष्यकारेण कृञ्वस्तयः त्रयो धातवः सामान्य–क्रिया वाचिकत्वेन; अन्ये सर्वे पचादयः धातवः क्रिया विशेषवाचित्वेन निर्दिष्टाः। यथा 'भावे' इति सूत्र भाष्ये भाष्यकारः कथयति 'कृम्वस्तयः क्रियासामान्य वचिनः, क्रियाविशेषवाचिनः पचादयः। यच्चात्र पचतेर्भवति न तद् भवते; पचतिर्भवति। यच्च भवते पचतिर्भवति न तत् पचते भवतिर्भवति। किं न पचते–र्भवतिर्भवति सामन्यम्। किं च भवतेः पचति र्भवति?[8] विशेषः। एते कृभ्वस्तयः धातवः सामान्यक्रियावाचित्वात् सर्वत्र विशेषक्रियाभिः सह प्रयोक्तुं शक्यन्ते पचति करोति, पचति भवति; पचति अस्ति इति।

भाष्यकारः अस्मिन् सन्दर्भे लौकिकं दृष्टान्तपि प्रस्तौति 'तद्यथा उपाध्यायं भवानमिवादयताम् इति स गत्वा मातुलमभिवादयते तथा मातुतस्य भागिनेय उपाध्यायस्य शिष्यो मातुलस्य भग्गिनेयं गत्वाह उपाध्यायं भवानमिवादयताम् इति स गन्वा मातुलमभिवादयते। तथा मातुलस्य भागिनेय उपाध्यायस्य शिष्यं गत्वाह 'मातुलं भवानभिवादयताम्' इति स गत्वा उपाध्यायं अभिवादयते। एतमिहापि पचते र्भवतौ यत यन्निर्दिश्यते 5 अत्र कैयटः वाक्यपदीयोद्धरेण भाष्यशयं स्पष्टयन् कथयति। तथा इति। यथा एकस्मिन् वस्तुनि मातुल

त्वमुपाध्यायत्वं भिन्नसम्बन्ध्याश्रयं परस्परमबाधेन व्यवस्थितं तथा पाकादिषु विशेषरूपता भावशब्दश्च वाच्यं च सामान्यम्।

स्वाश्रयं समवेतानां..................साधानं विदुः।।[9]

अत्र कारिकाभिप्रायं स्पष्टयन् कथयति 'स्वाश्रये साधनाश्रये समवेतानां क्रियाणाम्, तद्वदेवाक्षयान्तरे समवेतानां क्रियाणां अभिनिष्पत्तौ सिद्धौ यत्सामर्थ्यं तद् भाष्यकारप्रभृतयः साधनं विदुरिति पदयोजना। तत्र कर्तृत्वशक्तिरूपं सामर्थ्यं स्वाश्रये समवेतानां व्यापाररूपाणां क्रियाणां सिद्धौ साधनम्। कर्मत्वशक्तिरूपं सामर्थ्यं तु स्वाश्रये समवेतानां क्रियत इति कर्मव्युत्पत्त्या फलरूपाणां क्रियाणां सिद्धौ साधनम्। करणत्वादि–शक्तिरपं तु सामर्थ्यमाश्रयान्तरे स्वाश्रयतिरिक्ते आश्रये समवेतानां क्रियाणां फलरूपाणां व्यापाररूपाणां वा सिद्धौ साधनमिति विवेकः। तथापि करणत्वम्, फलरूपाणां क्रियाणां साधनम्।

तदुक्तम्–

**क्रियायाः परिनिष्पत्तिर्यद् व्यापारा दनन्तरम्।**

**विवक्ष्यते यदा यत्र करण तत् तदा स्मृतम्।।**[10]

अत्र क्रिया फलम्। सम्प्रदानत्वं तु दातृगतानां व्यापाररूपाणां क्रियाणां साधनम्। 'अश्वात्पतति' इत्यादावपादानत्वमपि परसमवेतानां व्यापाराणामेव क्रियाणां साधनम्। अधिकरणत्वं तु परसमवेतानां फलरूपाणां क्रियाणां साधनम्।

अनेन भाष्यादि विवरणे निर्दिष्टं भवति यत् कर्जादिकारक शक्ति रूपसाधन द्वारा हि क्रियायाः प्रवृत्तिः निवृत्तिः, अभिनिष्पत्तिः सिद्धिः सत्ता वा भवति इति वक्तुं शक्यते। सा च क्रिया किं स्वरूपेति जिज्ञासायां भाष्यकारः 'निष्ठा' सूत्रे पुनः कथयति 'अत्यन्तापर दृष्टा अनुमान–गम्याडशकया' पिण्डीभूता निदर्शमितम् यथा गर्भो निर्लुठित इति। सासौ येन येन शब्देन अभिसम्बन्ध्यते तावति तावति परिसाप्यत।[11] अर्थात् यथा अवयव समूहरूपो परिवर्तनशीलो कुक्षिस्थो गर्भो प्रत्यक्षगम्यो न भवति तथैव क्रियापि प्रत्यक्षेण ज्ञातुं शक्या अपितु अनुमानगम्या सा भवति कथमिति चेत् कैयटः वाक्यपदीयं उद्धरन् भाष्याशयं लिखति। परं प्रधानं प्रमाणं प्रत्यक्षम्। अनुमानस्य तत्पूर्वकत्वात्। तेन क्रिया न दृश्यते। ''धातोः'[12] इति सूत्राधिकरे द्विविधाः प्रत्यया विधीयन्ते कृत्प्रत्ययाः तिङ्प्रत्ययाश्च। 'क्रियावचनो धातुः, भाववचनो धातुः' इति स्वीकृत धातुलक्षणेन उभयविध प्रत्ययाः क्रियामेव बोधयन्ति व्यवहारदृष्ट्या तत्र क्रियायाः द्विधा प्रतीतिर्भवति। साध्यरूपा क्रिया सिद्धरूपा क्रिया सत्त्वभूता क्रिया वा तत्र व्यवस्धोयते। 'सार्वधातुके यक्'[13] इति सूत्रे भाष्यकार तिङ्भिहित भावस्य च किं किं भेदवैशिष्ट्यं भवति इति निर्दिशन् निगदति 'अस्ति खल्वपि तिङ्भिहितस्य भावस्य कृदभिहितस्य च कृदभिहितो भावो द्रव्यद्भवति। किमिदं द्रव्यवदिति? द्रव्यं क्रियया समवायं गच्छति। कं समवायं गच्छति? द्रव्यं क्रियाभि निर्वृत्तौ साधनत्वमुपैति। तद्वच्चास्य भावस्य कृदभिहितस्य भवति 'पाको वर्तते' इति। क्रियावन्न भवति। किमिदं

क्रियावदिति? क्रियावन्न भवति। किमिदं क्रियावदिति? क्रिया क्रियया समवायं न गच्छति– पचति, लिखति इति। तद्वाच्चास्य कृद्भि तस्य न भवति किन्तु भवति एव यथा इति शेषः पाको वर्तते इति। उभयोभगतं द्वितीयं वैशिष्ट्य निरूपयन् भाष्यकारोऽग्रे लिखति 'अस्ति खल्वपि विशेषः कृदभिहितेन भावेन कालापुरुषोपग्रहा व्याख्यन्ते, कृदभिहितेन पुनर्न व्यञ्यन्ते। उभयोर्विशेषान्तरं निर्दिशन् निगदति भाष्यकारः 'अस्ति खल्वपि लिङ्भिहितो भावः कर्जा संप्रयुज्यते, कृदभिहितः पुनर्न संप्रयुज्यते' अवयवसमूहस्य युगपदनुत्पादादनवस्थानाच्चददुक्तम्–

**क्रमात्सदसतां तेषामात्मनो न समूहिनाम्।**

**सद्ववस्तुर्विषयैर्यान्ति सम्बन्धं चक्षुरादिभिः।।[14]**

येन येन इति। शब्देन प्रत्यय्माना येन येन अवयवेन सम्बन्ध्यते समूहरपा क्रिया तस्मिन्नेवावयते समाप्यते। तत्रावयवानां कालत्रययोगात् क्रियाया अपि कालत्रयप्रयोगः। एकस्याः क्रियाया बह्व्य अवयवक्रिया भवन्ति इति निर्दशयन्। एकस्याः क्रियाया बह्व्य अवयवक्रिया भवन्ति इति निदर्शयन् भाष्यकारः कथयति 'यद्यप्येका सामान्य क्रिया। अवयवक्रियास्तु बह्वयः। अधिश्रयणोदकासेचन तण्डुलाव पनैछोपकर्षणक्रियाः। ताः कश्चित् कात्स्र्येन करोति कश्चिदकात्सर्येन कश्चिदकात्स्र्येन। तत्र यः कात्स्र्येन करोति स उच्यते पाप च्यत इति। पुनः पुनर्वा पचति पापच्यत इति।।[15]

कृदभिहितभावो द्रव्यवद् भवति इति भाष्यवचनस्याभि प्रायं स्पष्टयन् कैयटः कथयति 'द्रव्यवदिति। द्रव्यत्वेन प्रसिद्धौ यो घटादिस्तद्वद्वयं भावो भवति। लिङ्गसंख्यासाधनसम्बन्धप्रतिपत्त्या[16] द्रव्यं क्रियया समवायं गच्छति इति भाष्यवचनं स्पष्टयन् नागेश भट्ट उद्याते लिखति 'क्रियानिरूपित कर्मादिसंज्ञा समानाधिकरण शक्तिभिः सम्बन्धं गच्छति इत्यर्थः' द्रव्यं क्रियायाः सिद्धत्वरूपं सिद्धं भवति। अत्र वाक्यपदीयकारककृतविवेचनमपि द्रष्टव्यम्– 'सिद्धत्वरूपं सिद्धं भवति। अत्र वाक्यपदीयकारककृतविवेचनमपि द्रष्टव्यम्– 'सिद्धभावस्तु यस्तरूपाः स धमादिनिबन्धन्धः'[18] क्वचित् सिद्ध भावस्तु इत्यस्य स्थाने सत्त्वभाग स्तु इति पाठेऽपि विद्यते भाष्यादि परिशीलनेन उभयोः सिद्धसत्त्वपदयोः तात्त्विकभेदो नास्तीति वक्तुं शक्यते। तदित्थं क्रियाया उभयवि धं स्वरूपं साध्यत्वं सिद्धत्वञ्च शास्त्र सम्मतं व्यावहारिकञ्च विद्यते।

तत्र कैयटः वाक्यपदीय प्रमाणेन भाष्याशयं स्पष्टयन् कथयति सामान्य क्रियेति। साधारणी समूहरूपा क्रिया धातुवाच्येत्यर्थः। यथा उक्तं हरिणा–

**समूहश्च तथा भूतः प्रतिभेदं समूहिषु।**

**समाप्यते ततो भेदे कालभेदस्य संभवः।।[19]**

**गुणभूतावयवैः समूहः क्रमजन्मनाम्।**

**समूहश्च तथा भूतः प्रतिभेदं समूहिषु।।[20]**

आश्रितयणादिनां तादर्थ्येन प्रवर्तनाद गुणत्वादवयत्वं तस्याश्च साधारतवं उच्यते। विजाती याऽव्यवहिता साकल्पेनइत्यर्थः। क्रियायाः सामान्य क्रियाया5 अवयवक्रियाभिः सह ममन्वयपूर्वकं पूर्णता भवति; अवयवक्रियाणां भेदः पृथक्तया न प्रतीयते तासां बुद्धिविष यत्वादिति भावः। यथा नागेश तजैव उद्योते कथयति 'बुद्धिति'। अनेकानां सकलानाम–अवयवक्रियाणां बुद्धिविषयत्वेन यौगपद्यमिति भावः। बुद्धौ युगपदवस्थानमत्र समभिहार इति बोध्यम्। गुणभूतैरिति क्रमजन्मनाम् अधिश्रयणादीनां बुद्धया प्रकाल्पितो योडभेदस्तूपद्रूपसमूहस्तैरेव गुणभूतैरवयवैः सह क्रियेतयुच्य इत्यन्वयः। ननु प्रकृतं कटं देवदत्तः इत्यादौ कथं भूते क्त इत्यत आह समूहः स इति। तथाभूत उद्भूतावयवः। समूहिषु अवयवेषु। प्रतिभदें प्रत्येकम्। अभेदः इति। बुद्धिकृताभेदेऽपीत्यर्थः। तस्याश्च। यदव्यवधानेन फलोत्पत्तिस्तस्या इत्यर्थः। अनन्तरमिति। अव्यवधानेन फलोत्पादिकां प्रधानां क्रियामाहुः, अन्यसां तु तादर्थ्यान्तदारव्यता गौणो व्यवहार इत्यर्थः। विजातीयेति। यथा द्रव्यणां द्रव्यान्तरैरव्यवहितानां समभिव्याहारस्तथा क्रियाणामपि क्रियान्तरैरव्यवहितानामेव स इत्यर्थः। पुनः पुनर्वेति भाष्ये समूहरूपायाः क्रियायाः कालभेदात् भेदेऽपि सामात्यासैव पुनः पुनरनुष्ठीयत इति बुद्धया पौनः पुन्यमिति तात्पर्यम्। तदेवं पचति पुनः पुनः पचति पापचयत इत्यादौ अधिक्षयणादीनामवयवक्रियाणां सत्त्वेऽपि तासां बुद्धि कृताभेदविषयत्वात् गौणत्वाच्च पृथक्तया प्रयोगः न क्रियते बुद्धि कृताभेदविषयत्वात् गौणत्वाच्च पृथक्तया प्रयोगः न क्रियते सामान्यक्रियया धातुवाच्य क्रियया विवक्षित प्रत्यय द्वारा प्रयोगो विधीयते इति भावः। वाक्यपदीयस्य तृतीयकाण्डे भर्तृहरिः क्रियासमुद्देशे क्रिया विषयं विस्तरेण समीक्षितवान् अस्मिन् समुद्देशे अभिप्रायोऽस्ति यत् तद्धित प्रकरणे 'तेन दीव्यति खनति जयति जितम्, इत्यादिसूत्रेण तेन इति तृतीयान्तसर्थात् प्रातिपदिकात् दव्यति, खनति जयति इति तेषु अर्थेषु ठक् प्रत्यय भवति।[21] येन अक्षैर्पीव्यति ''आक्षिकः' इत्यादि प्रयोग सिद्धि र्भवति। अत्र सूत्रे दीव्यति खनत्पादौ तिङन्तनिर्देशा विद्यत तत्र तस्य तद्धितनिमित्तत्वेनोक्तत्वादपि 'क्रियाप्रधानमाख्यातम्' इति सिद्धान्तानुसारम् आक्षिक हत्पादौ तद्धितान्तादपि क्रियाप्रधान्यावगतिर्भवति इति तद्धितान्तशब्दप्रयोगः साधन प्रधानो भवति अतः दीव्यतीत्पादौ गुण प्रधान भावो विवक्षितो न भवति। अतः क्रियाप्रधानमाख्यानम् इति सिद्धान्तस्याज विपर्यपो दृश्यते। यद्यपि व्यतिक्रमस्यार्थे विपर्यशब्दः प्रयुज्यते किन्तु टीकाकारैज विवक्षाभाव इत्यर्थः प्रतिपादितो यथ्य प्रसङ्गानुकूलार्थो विद्यते।

वाक्यपदीयस्य तृतीयकाण्डे भर्तृहरिः क्रियासमुद्देशे क्रियाविषयं विस्तरेण समीक्षितवान्। अस्मिन् समुद्देशे त्रिषष्ठी संख्याकाः काारिकाः सन्ति यासां काश्चन कैयटेन भाष्यव्याख्याने उद्धृता येन स्पष्टतया ज्ञातुं शक्यते यद् भर्तृहरिः नूनमेव भाष्यसम्मतं विद्यते।

यावत् सिद्धमसिद्धं वा साध्यत्वेनाभि धीयते।[22] क्रियाया एतत् लक्षणं क्रियास्वरूप विचार प्रसङ्गे परिवर्तित व्याकरणशास्त्रविचारकैः सर्वैः प्रायः उदि्ध्रयते। कारिकाया अभिप्रायोऽस्ति सिद्धम् परिनिष्पन्नं अपाक्षीत्। असिद्धम् अनिष्पन्नं पचति वर्तमानं भविष्यच्च। वर्तमानं हि प्रारब्धा परिसमाप्तत्वरूपमिति वर्तमानमपि

आकाङक्षानुत्थापकच्छेकरूपेण असत्त्वभूतत्वेनाभिधीयते। तत्सर्वं क्रियेत्यभिधीयते। तत्र हेतुः– आश्रितक्रमरूपत्वादिति। सर्वाऽपि हि क्रिया लोके क्रियाणां समुदायरूपैव प्रसिद्धा। यथारोहणम् अवरोहणम्, गमनम्, आगमनम् पाक इत्यादि। सत्तावर्तमानत्वादि–रूपाऽपि क्रिया क्रमेणैव निष्पद्यत इति कर्त्रा क्रमेण क्रियमाणत्वात् क्रिया। तदेतदुम्तम् आश्रितक्रमरूप त्वादिति। आश्रितं क्रमरूपं यथा सा तथा तस्या भावस्तत्त्वं तस्मादिति।[23]

हरिणा उक्तं– **सम्बन्धमेदादर्थात्मा स विधिः पक्तिभावयोः।**[24]

भवतौ यदिति। भवतौ धातौ वाच्यत्वेनाव्यवस्थितं यत्सामान्यं पचादिधातुवाच्य विशेष समवेतं तत्प्रत्यार्थेन निर्दिश्यत इत्यर्थः। 'कृञ्चानुप्रयुज्यते लिति' इति सूत्रभाष्येऽपि प्रकारान्तरेण भाष्यकारेण एव एव क्रियासामान्यवाचिनः क्रियाविशेषवाधिनः धातवो निर्दिष्टाः सन्ति। यथा कथयति भाष्यकार 'कञिति नेदं धातुग्रहणम्।[25] किं तर्हि? प्रत्याहारग्रहणम्। क्व सन्निविष्टानां प्रत्याहारः कृञ्वस्तयः क्रिया सामान्य वाचिनः क्रियाविशेषवाचिनः पचादयः।[26] न च सामान्य वाचिनोरेव विशेषवाचिनोरेव वा प्रयोगो भवति। तत्र विशेषवाचिन उत्पत्तिः। सामान्यवाचिनोऽनु प्रयोक्ष्यन्ते। तदेवं भाष्यसम्मतसूत्र व्याख्याने कृञ्वस्तय इति जयाधातवः क्रियासामान्यवाचिनः अन्ये सर्वे धातवः क्रियाविशेषवाचिनो भवन्ति तेषां क्रियासामान्यवाचिनां क्रियाविशेषवाचिभिः धातुभिः सह प्रयोगऽनुप्रयोगो वा यथाशास्त्र कर्तुं शक्यत इति भावः।

अनेन प्रकारेण परिशीलनेन क्रियानिरूपण विषय विचारे कृते तथ्यमेतदवगन्तुं शक्यते यत् शास्त्रे लोके च क्रियायाः कीदृशं व्यापकं सूक्ष्ममनु मानगम्यं, सर्वव्यवहारोपयोगी शब्दार्थ–समवेतं सिद्धसाध्यत्वोपेतं सामान्यविशेषक्रियात्वयुतम् अवयवसमूहत्वसमवेतां सर्वकारकोपकारमिति विविध भेदाभेदयुक्तं विद्यते; यां विना शास्त्र चिन्तनं पूर्णं भवितुं नार्हति, लोकव्यवहारश्च सिद्धः न स्यात्। कालस्य सार्थक्यमपि क्रियया सदैव सम्भवति नान्यथेति क्रियास्वरूपं सर्वत्र स्ववैशिष्ट्यम्।

**सन्दर्भ ग्रन्थ सूची :**


1. महाभाष्यम्– भूवादयोधातवः सूत्र।
2. महाभाष्यम्– प्रशंसायांरूपम् सूत्र।
3. अष्टाध्यायी, महाभाष्यम्।
4. वाक्यपदीयम्– 2/206।
5. महाभाष्यम्– 1/3/1।
6. महाभाष्यम् 3/3/139।
7. वा0प0 साधनसमुद्देशः।
8. सिद्धान्तकौमूदी भ्वादि प्रकरणम्।

9. वाक्यप्रदीयम्।

10. तत्रैव हेताराजः।

11. महाभाष्यम् 3/2/102

12. सिद्धान्त कौमुदी।

13. तत्रैव उद्योतः।

14. वाक्यपदीयम्– क्रिया समुद्देशः।

15. महाभाष्यम् 3/1/2।

16. तत्रैव प्रदीपः।

17. तत्रैव उद्योतः।

18. वाक्यपदीयम् (कि0स0 47)

19. वाक्यपदीयम् (क्रि0स0)

20. वाक्यपदीयम् (क्रि0स0)

21. सिद्धान्तकौमुदी

22. वाक्यपदीयम् (क्रि0स0)

23. तथैव अम्बाकर्त्री।

24. वाक्यपदीयम् (क्रि0स0)

25. अष्टाध्यायी।

26. महाभाष्यम्।